National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 124-128
© 2026 NJHSR
www.sanskritarticle.com

**निताइबिश्वासः**
शोधच्छात्रः,
अनुसन्धानप्रकाशनविभागः.
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आ.प्र.

**Correspondence:**
**निताइबिश्वासः**
शोधच्छात्रः,
अनुसन्धानप्रकाशनविभागः.
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आ.प्र.

# पुरुषोत्तममाहात्म्ये श्रीजगन्नाथस्य परतत्त्वस्वरूपम्

**निताइबिश्वासः**

**सारांशः (Summary)**

स्कन्दपुराणस्य पुरुषोत्तमक्षेत्रमाहात्म्यं वैष्णवागमस्य 'ज्ञानपाद'(विद्यापाद)सिद्धान्तैः सह पूर्णतः सम्बद्धम् अस्ति। अस्मिन् भगवतः श्रीजगन्नाथस्य परतत्त्वस्वरूपम्, अद्वयत्वम्, जगदाधारत्वम्, परमार्थस्वरूपं च बहुधा वर्णितम् अस्ति। दर्शनस्य पञ्चकृत्वसिद्धान्तः (सृष्टिः, स्थितिः, लयः, तिरोभावः, अनुग्रहः) अपि अत्र स्तुतिमाध्यमेन चर्चितः अस्ति। भगवान् श्रीजगन्नाथः जगदाधारः, परमेश्वरः, मुक्तेः एकमात्रं कारणं च मन्यते। सः 'क्षराक्षरव्यतीतः' पुरुषोत्तमः अस्ति। यद्यपि सः वस्तुतः निर्गुणः निराकारश्च अस्ति, तथापि साधकानां ध्यानाय पूजायै च 'नीलजीमूतसङ्काशः' (मेघवर्णः) तथा 'शङ्खचक्रादिचिह्नितः' भूत्वा दिव्यं सगुणं रूपं धत्ते। अस्मिन् माहात्म्ये शिव-विष्णोः परमं तादात्म्यं दर्शितम् अस्ति। विष्णुः शिवं स्वस्य 'द्वितीया तनुः' (द्वितीयं शरीरम्) कथयति। शिवः स्वयम् आत्मानम् अष्टधा विभज्य विष्णोः क्षेत्रपालरूपेण सेवां करोति, अन्तर्वेद्याः (शङ्खक्षेत्रस्य) रक्षणं च करोति। वेदान्तेषु यत् निर्गुणं ब्रह्म गीयते, तदेव अत्र भक्तानुग्रहार्थं 'दारुवपुः' (काष्ठशरीरम्) धृत्वा स्थितम् अस्ति। दारु शब्दस्य यौगिकः अर्थः अस्ति - यः सर्वदुःखानि विदारयति (खण्डयति) अखण्डानन्दं च ददाति। अत्र वासुदेव-बलभद्र-सुभद्रा-सुदर्शनानां चतुर्मूर्तयः एकस्यैव परमेश्वरस्य 'व्यूहतत्त्वस्य' प्रतीकाः सन्ति, याः क्रमशः ऋग्वेद-सामवेद-यजुर्वेद-अथर्ववेदरूपाः कल्प्यन्ते। भगवान् एव शब्दब्रह्म, यज्ञः, यज्ञेशः, भोक्ता, भोज्यम्, हविः, होता तथा च सर्वकर्मणां फलप्रदाता अस्ति। सः सर्वेषां जीवानां बुद्धेः कर्मणां च प्रेरकः अन्तर्यामी परमात्मा अस्ति।

**कूटशब्दाः (Keywords)**

पुरुषोत्तममाहात्म्यम्, जगन्नाथपरतत्त्वम्, ज्ञानपादसिद्धान्तः, सगुणनिर्गुणस्वरूपम्, दारुब्रह्म, शिव-विष्णवभेदः, चतुर्मूर्त्तिव्यूहः, अर्चाविग्रहः, शब्दब्रह्म, मुक्तिप्रदाता

स्कन्दपुराणस्य पुरुषोत्तमक्षेत्रमाहात्म्यम् आगमोक्त**'ज्ञानपाद'**(विद्यापाद)सिद्धान्तैः सह पूर्णतः युक्तोऽस्ति। भगवतः श्रीजगन्नाथस्य परतत्त्वस्वरूपम् अद्वयत्वं जगदाधारत्वं परमेश्वरत्वं परमार्थस्वरूपञ्च बहुत्र वर्ण्यते । दर्शनस्य पञ्चकृत्वसिद्धान्तः सृष्टिः, स्थितिः, लयः, तिरोभावः, अनुग्रहः अत्र स्तुत्या चर्च्चितः अस्ति । सृष्टिप्रक्रिया, क्षेत्रमाहात्म्यम्, मुक्तिः, दारुब्रह्मस्वरूपम् इत्यादयोऽपि तात्त्विकदृष्ट्या अत्र उल्लिखिताः सन्ति । एतेषां सर्वेषामपि अध्ययनेन भक्तः श्रद्धालुः जिज्ञासुः मुमुक्षुः जीवः अवश्यमेव ज्ञानं सम्प्राप्य विवेकोदयेन मुक्तिं चरमसुखं शान्तिं च प्राप्नुयादिति निश्चयेन वक्तुं शक्यते । अत्र पुनः श्रीजगन्नाथस्य तत्त्वेन सह श्रीबलभद्र-सुभद्रा-सुदर्शन-नृसिंहादीनामपि तात्त्विकं ब्रह्मज्ञानप्रदायकं विमर्शनं क्रियते । शक्तितत्त्वस्यापि बहुधा वर्णना क्रियते । क्रमशः अत्र केचन विचाराः प्रस्तूयन्ते ।

**जगन्नाथस्य परतत्त्वस्वरूपम् -** आगमस्य ज्ञानपादे ईश्वरः 'परः' तथा 'अद्वयः' इति रूपेण वर्णितः । पुरुषोत्तममाहात्म्ये प्रथमाध्याये ब्रह्मा विष्णोः स्तुतिं कुर्वन् तं **'जगदाधार'**, **'परमेश्वर'** तथा **'परमार्थस्वरूप'** इति सम्बोधयति । यथा –

**मुक्त्येककारणं विष्णुं स्तोष्येऽहं परमेश्वरम् ।**
**नमस्ते जगदाधार ! शङ्खचक्रगदाधर ! ।।**

**यन्नाभिपङ्कजादेव जातोऽहं विश्वसृष्टिकृत् ।**
**परमार्थस्वरूपं ते त्वं वै वेत्सि जगन्मय ।।**
**यन्मायया जगत्सर्वं निर्मितं महदादिकम् ।**
**यन्निःश्वाससमुद्भूतं शब्दब्रह्म त्रिधाऽभवत् ।।**
**उपजीव्य तदेवाहमसृजं भुवनानि वै ।**
**त्वत्तो नान्यः स्थूलसूक्ष्मदीर्घह्रस्वादि किञ्चन ।।**
**विकारभेदैर्भगवंस्त्वमेवेदं चराचरम् ।**
**कटकादि यथा स्वर्णं गुणत्रयविभागशः ।।**
**स्रष्टा सृज्यं त्वमेवात्र पोष्टा पोष्यं जगत्प्रभो ! ।**
**आधारो ध्रियमाणश्च धर्त्ता त्वं परमेश्वर ! ।।**
**त्वत्प्रेरितमतिः सर्वश्चरते च शुभाऽशुभम् ।**
**ततः प्राप्नोति सदृशीं त्वयैव विहितां गतिम् ।।**
**जगतोऽस्य गतिर्भर्त्ता साक्षी त्वं परमेश्वर ! ।**
**चराचरगुरो सर्ववीजभूत कृपामय ।।**[1] इति।

ब्रह्मणा कृता इयं विष्णुस्तुतिः वैष्णवागमस्य परमं दार्शनिकं रहस्यं प्रकटीकरोति । अस्मिन् स्तवे भगवान् विष्णुः जगतः आधारः, रक्षिता, तथा च मुक्तेः एकमात्रं कारणं मन्यते । ब्रह्मणः उत्पत्तिः भगवतः नाभिकमलात् अभवत्, यः स्वयं विश्वस्य स्रष्टा अस्ति। विष्णोः मायया एव महदादितत्त्वानां निर्माणं भवति, येन कृत्स्नं जगत् सञ्चाल्यते । भगवतः निःश्वासात् एव त्रिविधं शब्दब्रह्म (वेदाः) आविर्भूतं, यस्य आधारेण ब्रह्मा भुवनानि सृजति। अस्मिन् संसारे स्थूलं सूक्ष्मं वा यत्किञ्िदपि अस्ति, तत् सर्वं भगवतः विष्णोः भिन्नं नास्ति। यथा सुवर्णात् कटककुण्डलाद्यलङ्काराः भवन्ति, तथा गुणत्रयविभागेन भगवान् एव चराचररूपेण भासते । सः एव स्रष्टा, सृज्यम्, पोष्टा, पोष्यम्, आधारः, तथा च ध्रियमाणं तत्त्वं वर्तते । सर्वेषां जीवानां बुद्धिः भगवता एव प्रेरिता भवति, यया ते शुभाशुभं कर्म कुर्वन्ति । अन्ते सर्वे जीवाः भगवता विहितां स्वकर्मसदृशीं गतिं प्राप्नुवन्ति । एवं भगवान् श्रीजगन्नाथः जगतः साक्षी, भर्ता, तथा च सर्वबीजभूतः कृपामयः परमात्मा इति अत्र उच्यते।

श्रीजगन्नाथोऽत्र **'क्षराक्षरव्यतीतः'** पुरुषोत्तमः इति वर्ण्यते ।[2] यः मायावृतः सन् अपि शरणागतवत्सलः अस्ति। द्वितीयाध्यायेऽपि **"त्वयि प्रोतमिदं सर्वं सूत्रे मणिगणा यथा"** (श्लो.१६) इति श्रीजगन्नाथस्य परतत्त्वं निगदति ।

आगमोक्तज्ञानपादे वैष्णवशैवदृष्ट्या आराध्यदेवस्य सगुणनिर्गुणस्व-रूपमुच्यते। तथैवात्रापि पुरुषोत्तममाहात्म्ये ईश्वरस्य उभयविधं स्वरूपं कथ्यते । सगुणवर्णना यथा-

**नीलजीमूतसंकाशः शंखचक्रादिचिह्नितः ।**
**पतङ्गेन्द्रसमारूढः स्फुरद्वदनपङ्कजः ।।**[3]

अत्र भगवान् **'नीलजीमूतसङ्काशः'** इति वर्णितः । यथा नीलवर्णीयः मेघः नयनाभिरामः भवति, तथैव भगवतः शरीरस्य वर्णः अस्ति । निर्गुणं तत्त्वं वर्णरहितं भवति, अतः अस्मिन् वर्णवर्णनेन भगवतः सगुणत्वं सिद्ध्यति । तथैव भगवान् **'शङ्खचक्रादिचिह्नितः'** अस्ति । आगमशास्त्रेषु भगवतः शक्तिः आयुधरूपेण प्रकटिता भवति । शङ्खः शब्दब्रह्मणः प्रतीकः, चक्रं च कालस्य वा सुदर्शनशक्तेः प्रतीकम् अस्ति । एतादृशानां चिह्नानां धारणम् तस्य सगुणैश्वर्यशालिरूपस्य परिचयं ददाति । अत्र भगवान् 'पतगेन्द्रसमारूढः' (गरुडवाहनः) इति उक्तः। निराकारं ब्रह्म कुत्रचित् स्थितं न भवति, किन्तु सगुणात्मके रूपे भगवान् स्ववाहनस्य उपरि आरूढः सन् भक्तानां रक्षणाय सर्वत्र गच्छति । श्लोके **'स्फुरद्वदनपङ्कजः'** इति पदं प्रयुक्तम्। अर्थात् भगवतः मुखकमलं प्रसन्नतया स्फुरति । इयं मुखमुद्रा भगवतः करुणां, प्रसन्नतां, भक्तेभ्यः उपदेशदानाय इच्छां च दर्शयति। एतादृशाः भावाः केवलं सगुणे ईश्वरे एव सम्भवन्ति।

ज्ञानपादस्य दृष्ट्या, यद्यपि भगवान् वस्तुतः निर्गुणः अस्ति, तथापि साधकानां ध्यानाय, पूजायै, तथा च जगति धर्मसंस्थापनाय सः एतादृशं दिव्यं सगुणं रूपं धत्ते। अत्र स्कन्दपुराणे भगवतः आविर्भावः (Apparition) सगुणात्मकः अस्ति येन ब्रह्मा तं साक्षात् द्रष्टुं शक्नोति । अतः अयं श्लोकः भगवतः सगुण-ब्रह्म-स्वरूपस्य उत्कृष्टं उदाहरणम् अस्ति।

तत्रैव श्रीपुरुषोत्तममाहात्म्यस्य प्रथमाध्याये ब्रह्मणा ब्रह्म शब्दातीतम्, स्थूल-सूक्ष्म-दीर्घ-ह्रस्वादि-भेदराहित्यम् इति प्रतिपाद्यते[4]।

द्वितीयाध्याये ईश्वराद्वैतसम्बन्धः प्रदर्श्यते । यमराजकृतायां स्तुतौ भगवान् विष्णुः जगत्कारणरूपेण वर्णितः । यथा सूत्रे मणयः प्रोताः भवन्ति, तथा भगवान् अस्मिन् जगति ओतप्रोत ोऽस्ति । तद्धि — **"त्वयि प्रोतमिदं सर्वं सूत्रे मणिगणा यथा"**[5] इति । अध्यायेऽस्मिन् भगवतः द्विविधं स्वरूपं चूच्यते[6]। यथा –

**(१) निर्विकारं परं ब्रह्म :** यत् कूटस्थम् अपरिवर्तनीयं च अस्ति ।

**(२) विकारि जगत् :** यत् भगवतः 'सिसृक्षा' (स्रष्टुम् इच्छा) अथवा 'प्रकृति'द्वारा रचितम्। भगवान् स्वमायया गुणात्मिकया रज्जवा इदं विश्वं बध्नाति, परं स्वयं मुक्तः अस्ति।

तृतीयाध्याये मार्कण्डेयस्तुतौ भगवान् विष्णुः एकत्वेऽपि अनेकत्वेन भासते इति अद्वैतपरं ज्ञानं दत्तम् । येन तस्य जगत्कारणत्वं ज्ञायते । यथा -

**एकं सुवर्णं कटकादिभेदैर्नाना**
**यथा वा नभसोदितोऽर्कः ।**
**आधारवैषम्यजलेषु तादृग्**
**विभाव्यसे निर्गुण एक एव ॥**[7]

यथा स्वर्णम् एकम् एव भूषणभेदेन अनेकं भवति, तथा भगवान् निर्गुणः सन् अपि विश्वरूपेण भासते।

तत्रैव मार्कण्डेयमुनिः भगवतः सर्वान्तर्यामित्वं कुक्षिगतब्रह्माण्डं च (God as the Container of Universe) निरूपयति । सः बालमुकुन्दस्य शरीरे चतुर्दश भुवनानि पश्यति । एतत् ज्ञानपादस्य 'विश्वरूपदर्शनस्य' पराकाष्ठा अस्ति । तत्रोच्यते स्कान्दे -

**ब्रह्माण्डोदरगं वस्तु यत्किञ्चित्परमेष्ठिना ।**
**सृष्टं सर्वं ददृशेऽसौ तत्कुक्षौ स महामुनिः ॥**[8]

ब्रह्मलोकात् प्रत्यागत्य राजा इन्द्रद्युम्नः सुदीर्घकालात् परं साक्षात् दारुब्रह्मरूपिणं जगन्नाथं पश्यति। तस्य रोमाञ्चः अश्रुपातः च तस्य परां भक्तिं सूचयति। सः एवं स्तौति:

**नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।**
**प्रणतार्त्तिविनाशाय चतुर्वर्गैकहेतवे ॥ २ ॥**

**हिरण्यगर्भपुरुषप्रधानव्यक्तरूपिणे ।**
**ॐ नमः वासुदेवाय शुद्धज्ञानस्वरूपिणे ॥ ३ ॥**

**तात्त्विकार्थः:** भगवान् जगन्नाथः केवलं काष्ठमूर्तिः नास्ति, अपितु सः साक्षात् 'हिरण्यगर्भः', 'पुरुषः', 'प्रधानम्' (प्रकृतिः), 'व्यक्त-अव्यक्तरूपः' च अस्ति। सः 'शुद्धज्ञानस्वरूपः' वासुदेवः अस्ति, यः भक्तस्य चतुर्वर्गं (धर्म-अर्थ-काम-मोक्षं) ददाति।

वैष्णवागमेषु ज्ञानपादे शिव-विष्णोः एकता अपि दर्शिता । विष्णुः मार्कण्डेयं कथयति यत् शिवः मम 'द्वितीया तनुः' अस्ति । यथा -

**यत्तीरे तप आस्थाय मद्द्वितीयतनुं शिवम् ।**
**आराध्य मदनुक्रोशान्मृत्युं जेष्यसि निश्चितम् ॥**[9]

चतुर्थाध्याये शिव-विष्णोः तादात्म्यं क्षेत्रपालत्वं च वर्ण्यते। आगमानुसारं विष्णोः क्षेत्रे शिवस्य स्थितिः अपि अनिवार्या। पुरुषोत्तमक्षेत्रमाहात्म्यवर्णनानुसारेण शिवः स्वयम् आत्मानम् अष्टधा भित्त्वा विष्णोः सेवां करोति । यथा -

**रुद्राण्याश्चाष्टधा भेदं दृष्ट्वा रुद्रोऽपि शंकरः ।**
**आत्मानमष्टधा भित्त्वा उपास्ते परमेश्वरम् ॥**[10]

अत्र ज्ञानविषयः अस्ति यत् मुक्तिप्रदाता विष्णुः एव, परं शिवः तत्र सहायकः (क्षेत्रपालः) भवति ।

द्वादशाध्यायेऽपि शिव-विष्णोः अभेदत्व निरूप्यते। तत्र शिवः भगवान् इन्द्रद्युम्नं प्रति वदति यत् सः स्वयं भगवतः विष्णोः हृदयसन्निभायाः **'अन्तर्वेद्याः'** (शङ्खक्षेत्रस्य) रक्षणार्थं स्थितः अस्तति। यथा –

**"शङ्खाकृतेरग्रभागे नीलकण्ठोऽहमास्थितः"**[11]इति ।

चतुर्थाध्याये **'दारुमय-ब्रह्म'** इति सिद्धान्तः उपस्थापितः । वेदान्तेषु यत् निर्गुणं ब्रह्म गीयते, तदेव अत्र दारुवपुः धृत्वा स्थितम् अस्ति। एतत् ज्ञानपादस्य गूढरहस्यम् । तद्धि - **तस्माद्दारुमयं ब्रह्म वेदान्तेषु प्रगीयते ।**[12]

अत्रोच्यते पुनः अर्चाविग्रहस्य वैशिष्ट्यम् -

**अधिष्ठानं विना ब्र◌ाह्म्यमैश्वर्यं नोपलभ्यते ।**
**रहस्यमेतत्परमं विष्णोः स्थानमनुत्तमम् ॥**[13]

अर्थात् ब्रह्म निर्गुणं सन् अपि अधिष्ठानं (प्रतिमां) विना व्यावहारिकं मोक्षं न ददाति।

अष्टमाध्याये परतत्त्वस्य व्यापकत्वं सृष्टिलयधारस्वरूपञ्च वर्ण्यते विद्यापतिना। सः भगवन्तं प्रति यत् स्तवनं करोति, तत् शुद्धं तान्त्रिक◌ागमिकञ्च ज्ञानं प्रतिपादयति । यथा -

**प्रधानपुरुषातीत ! सर्वव्यापिन् ! परात्पर ! ।**
**चराचरपरीणाम ! परमार्थ ! नमोऽस्तु ते ॥**
**त्वत्त एतज्जगत्सर्वं सृष्टौ सम्पद्यते विभो ! ।**
**त्वदाधारमिदं देव ! त्वयैव परिपाल्यते ॥**
**कल्पान्ते संहृतं सर्वं त्वत्कुक्षौ सावकाशकम् ।**
**सुखं वसति सर्वात्मन्नन्तर्यामिन्नमोऽस्तु ते ॥**[14]

एते श्लोकाः आगमोक्त 'वासुदेव'तत्त्वस्य निर्गुणसगुणोभयपक्षं दर्शयन्ति, यत्र भगवान् प्रपञ्चस्य अभिन्ननिमित्तोपादानकारणं वर्तते । विष्णोः प्रतिमा अर्चावतारः अस्ति । तस्य चिन्मयत्वमत्र निरूप्यते । आगमेषु अर्चाविग्रहस्य केवलं शिलात्वं न◌ापितु **'साक्षाद्ब्रह्मत्वम्'** एव निरूप्यते। श्रीपुरुषोत्तम-क्षेत्रमाहात्म्ये श्रीविष्णोः नीलेन्द्रमणि-प्रतिमायाः निरूपणं क्रियते। सा एव प्रतिमा श्रीवासुदेवस्य साक्षान्मुक्तिप्रदायिनी तनुरस्ति । यथा -

**तस्य प्राक्तटमास्थाय नीलेन्द्रमणिनिर्मिता ।**
**तनुः श्रीवासुदेवस्य साक्षान्मुक्तिप्रदायिनी ॥**[15]

विद्यापतिः इन्द्रद्युम्नाय नीलमणेः दिव्यप्रतिमायाः यत् स्वरूपं वर्णयति, तत् केवलं पाषाणवर्णनं नास्ति, अपितु तत् 'साक्षाद्ब्रह्म' इति प्रतिपादयति ।

**"नीलेन्द्रमणिपाषाणमयीमूर्त्तिः पुरातनी ।"**[16]
**"वपुषोऽश्ममयत्वेऽपि सुस्मितस्नपिताधरः ।"**[17]

अत्र जडप्रतिमायाम् अपि चैतन्यस्य (सस्मितत्वस्य) आरोपः आगमिक-अर्चावतार-सिद्धान्तं पुष्णाति ।

आगमेषु विष्णोः अन्तर्यामित्वं सर्वगतत्वं च प्रतिपाद्यते । दशमाध्याये वैष्णवलक्षणप्रसङ्गे इदं ज्ञानं दरीदृश्यते । यथा -

**विष्णोरन्यं न पश्यन्ति विष्णुं नान्यत्पृथक्कृतम् ।**[18]
**अन्तर्यामी यदा देवः सर्वेषां हृदि संस्थितः ।**
**सेव्यो वा सेवको वापि त्वत्तो नान्योऽस्ति कश्चन ॥**[19]

**अष्टादशाध्याये** ज्ञानपादस्य मुख्यांशः निरूप्यते यत् भगवान् स्वकीयं दिव्यदेहं त्यक्त्वा दारुरूपेण (काष्ठरूपेण) भक्तानुग्रहार्थम् आविर्भवतति ।

**तदङ्गस्खलितं रोम तरुत्वमुपपद्यते ।**
**अंशावतारः स्थास्नुर्यः पृथिव्यां परमेष्ठिनः ॥**
**तद्रूपावतारं याति भगवान् भक्तवत्सलः ।**[20]

ऊनविंशेऽध्याये चतुर्मूर्तिरहस्य (व्यूहतत्त्वम्) निरूप्यते । आगमेषु एकस्यैव परमेश्वरस्य चतुर्धा विभागः **'व्यूह'** इति कथ्यते । अत्र वासुदेव-बलभद्र-सुभद्रा-सुदर्शनानां चतुर्मूर्तयः तस्यैव प्रतीकभूताः भवन्ति ।

**शाखाग्रस्तम्भमध्यस्थं तद्रूपं तत्तूरीयकम् ।**
**एवं तु मूर्त्तयस्तेन चतस्रो वै प्रकाशिताः ॥**[21]

भगवतः दारुवपुषः स्वरूपं महत्त्वं च निरूपयता व्यासेनोच्यते यत् सिन्धुतीरे प्राप्तं तत् दारु मानवनिर्मितं नास्ति, अपितु अपौरुषेयमस्ति। राजानम् इन्द्रद्युम्नं प्रति कश्चित् द्विजो वदति यत् एषा प्रतिमा न, अपितु वेदान्तप्रतिपाद्यं परं ब्रह्म एव अस्ति -

**"प्रतिमां न तु जानीहि निःश्रेयसकरं नृणाम्"**[22] **इति ।**

दर्शनादेव अयं प्रभुः मुक्तिं ददाति, यत् ज्ञानमार्गेण सुलभं नास्ति।

देवाः ब्रह्माणं पृच्छन्ति यत् पूर्वं नीलाद्रौ यः मणिमयः (नीलमाधवः) आसीत्, सः कथं सम्प्रति अन्तर्हितः भूत्वा दारुदेहधृक् (जगन्नाथः) अभवत् ? तत्र ब्रह्मा परमं गुह्यं रहस्यं वदति । यथा -

**दारुमूर्त्तिरयं देवो भुवनानां हि मध्यमे ।**
**ममायुष: प्रमाणं तु स्थास्यते मानयन् प्रभु: ॥**
**ममात्मा एष भगवानहमेतन्मय: सुरा: ।[23]**

ब्रह्मा स्पष्टयति यत् अयं दारुमूर्तिजनार्दनः ब्रह्माण्डस्य केन्द्रे (भुवनानां मध्यमे पुरुषोत्तमक्षेत्रे) मम आयुषः पर्यन्तं (महाप्रलयं यावत्) अत्रैव स्थास्यति । ब्रह्मा वदति, **"एषः भगवान् मम आत्मा अस्ति, अहञ्च एतन्मयः अस्मि।"**

भगवतः दारुशरीरं प्राकृतं काष्ठं नास्ति, अपितु तत् साक्षात् परमपुरुषस्य अङ्गजं वर्तते इति ब्रह्मा देवान् बोधयति । यथा -

**क्षीरोदार्णवमध्ये हि श्वेतद्वीपे हि तल्पके ।**
**य: शेते योगनिद्रां तां मानयन्पुरुषोत्तम: ॥**
**स मूलं जगतामादिस्तस्य रोमाणि यानि वै ।**
**तानि कल्पद्रुमाख्यानि शङ्खचक्राङ्कितानि वै ॥**
**तन्मध्यस्थो ह्ययं वृक्षश्चैतन्याधिष्ठित: पुरा ।**
**स्वयमुत्पतित: सिन्धौ सलिले सत्यपूरुष: ॥[24]**

क्षीरसागरे श्वेतद्वीपे यः शेषशायी पुरुषोत्तमः अस्ति, सः जगतः मूलकारणम् अस्ति । तस्य शरीरे यानि **'रोमाणि'** सन्ति, तानि एव **'कल्पवृक्षाः'** भवन्ति, यानि शङ्खचक्रादिभिः अङ्कितानि सन्ति । तस्यैव चैतन्यमयस्य कल्पवृक्षस्य एकः भागः समुद्रजले स्वयं प्रकटितः अभवत्, यः साक्षात् 'सत्यपुरुषः' अस्ति । सः जनार्दनः त्रिलोकस्थानां भक्तानां भोगान् भोक्तुं, घोरसंसारस्य नाशाय च 'दारुवर्त्मा' (दारुशरीरी) अभवत्।

अयं श्रीजगन्नाथः कर्म-यज्ञ-नियन्ता भवति । देवाः भगवन्तं प्रतिपादयन्ति यत् संसारे यावन्तः व्यापाराः सन्ति, ते सर्वे तन्मया एव । यथा -

**त्वमेव यज्ञो यज्ञांशस्त्वं यज्ञेशः परात्परः ।**
**शब्दब्रह्मापरं त्वं हि शब्दब्रह्मासि विश्वराट् ॥**
**स्वराट्सम्राड्जगन्नाथ विराडसि जगत्पते ।**
**अधश्चोर्ध्वञ्च तिर्यक्त्वं त्वया व्याप्तं जगन्मय ॥**
**प्राप्नुवन्ति परं स्थानं त्वां यजन्तश्च याज्ञिकाः ।**
**भोज्यं भोक्ता हविर्होता हवनं त्वं फलप्रद: ॥**
**समस्तकर्मभोक्ता त्वं सर्वकर्मात्मक: प्रभो ।**
**सर्वकर्मोपकरणं सर्वकर्मफलप्रदः ॥**
**कर्मप्रेरयिता त्वं हि धर्मकामार्थसिद्धिद: ।**
**त्वामृते मुक्तिदः कोऽन्यो हृषीकेश नमोऽस्तु ते ॥[25]**

भगवान् एव शब्दब्रह्म अस्ति । यज्ञे भोक्ता, भोज्यम्, हविः, होता, हवनं तथा च तस्य फलप्रदाता—सर्वं स एव अस्ति। सः एव जीवानां बुद्धेः कर्मणां च प्रेरयिता (अन्तर्यामी) अस्ति।

इन्द्रद्युम्नस्य संशयं (वाणी पूर्वं 'चतुर्मूर्त्तिः' अवदत्, परम् इदानीम् 'एकः' नृसिंहः कथं दृश्यते ?) निवारयन् ब्रह्मा वेदान्तदर्शनं निरूपयति। यथा -

**खण्डनात्सर्वदु:खानामखण्डानन्ददानत: ।**
**स्वभावाद्दारुरूपं हि परंब्रह्माभिधीयते ॥**
**शब्दब्रह्म परंब्रह्म नानयोर्भेद इष्यते ।**
**लये तु एकमेवेद सृष्टौ भेद: प्रवर्त्तते ॥[26]**

**'दारु'** शब्दस्य अत्र यौगिकः अर्थः कृतः — यः सर्वदुःखानि विदारयति (खण्डयति) अखण्डानन्दं च ददाति, सः स्वभावात् 'दारुः' (परं ब्रह्म) उच्यते । शब्दब्रह्मणि परब्रह्मणि च कश्चन भेदो नास्ति । प्रलये एकत्वं भवति, सृष्टौ च भेदः ।

प्रथमाध्याये श्रीजगन्नाथस्य दारुब्रह्मरूपेणाविर्भावस्य उल्लेखः क्रियते। यथा –

**पुरुषोत्तमाख्यं सुमहत्क्षेत्रं परमपावनम् ।**
**यत्रास्ते दारवतनु: श्रीशो मानुषलीलया ।।[27]**

अपि च मुनयः पृच्छन्ति – "**कथं दारुमयस्तस्मिन्नास्ते परमपुरुषः**"[28] इति ।

**"कथं दारुमयो... आस्ते परमपुरुषः"**। एषः प्रश्नः आगमीयप्रतिमा-विज्ञानस्य आधारः अस्ति । भगवान् स्वयं कथयति यत् सः तत्र 'देभभृत्' (शरीरधारी) भूत्वा तिष्ठति, येन चर्मचक्षुषा अपि तस्य दर्शनं सम्भवति[29] ।

श्रीपुरुषोत्तमक्षेत्रे विराजमानाः चतस्रः मूर्त्तयः चतुर्वेदस्वरूपाः भवन्ति इति उच्यते अत्र । ब्रह्मा कथयति -

**ऋग्वेदरूपी हलधृक्सामवेदो नृकेशरी ।**
**यजुर्मूर्त्तिस्त्वियं भद्रा चक्रमाथर्वणं स्मृतम् ॥[30]**

यदा इन्द्रद्युम्नः ब्रह्मलोके आसीत्, तदा पृथिव्यां 'गालो' नाम राजा अभवत्। सः इन्द्रद्युम्नेन निर्मिते मन्दिरे साक्षात् शिलामयीं 'माधव'मूर्तिं संस्थाप्य पूजयामास । पश्चात् यदा इन्द्रद्युम्नः आगतः, तदा गालराजः क्रुद्धः सन् युद्धार्थं सेनां नीत्वा आगतः।

**गालो नाम महीपालस्तदा क्षितितलेऽभवत् ।**
**सोऽप्यत्र प्रतिमां कृत्वा माधवाख्यां दृषन्मयीम् ॥**
**स्थापयित्वात्र प्रासादे पूजयामास ऋद्धिमत् ।**
**गालोऽभ्यगात्ससैन्य: सन्क्रुद्धस्तं नीलपर्वतम् ॥[31]**

अत्रार्चाविग्रहस्य सूचना प्राप्यते । एवमनेकेषु सन्दर्भेषु भगवतः श्रीजगन्नाथस्य तत्त्वानि ब्रह्मपरकाणि परि- शीलितानि । अयं निराकारः, निर्गुणः, गुणात्मा, जगत्स्रष्टा, विभुः, अनन्तः, सर्वनियन्ता, सर्वकर्ता, सर्वकारणकारणं च भवति । अनेकानि तस्य वैशिष्ट्यान्यत्र तात्त्वाकदृष्ट्या परिशीलितानि, यानि आगमोक्तज्ञानपादे उल्लिख्यन्ते।

## उपसंहारः (Conclusion)

स्कन्दपुराणान्तर्गत-पुरुषोत्तमक्षेत्रमाहात्म्यस्य अध्ययनेन इदं स्पष्टं भवति यत् श्रीजगन्नाथः केवलं काष्ठमयी जडा मूर्तिः नास्ति, अपितु वेदान्तप्रतिपाद्यं साक्षात् परं ब्रह्म एव अस्ति, यः दारुरूपेण अत्र विराजते। अयं ग्रन्थः वैष्णवागमस्य दार्शनिकं रहस्यं सरलीकृत्य

उपस्थापयति, यत्र सगुण-निर्गुणयोः तथा च शिव-विष्णोः अभेदत्वं संस्थाप्य धार्मिकसमन्वयस्य उत्कृष्टः सन्देशः दत्तः अस्ति। अत्र प्रतिपादितस्य दारुब्रह्मणः, चतुर्मूर्तीनां च तात्त्विकं विवेचनं जिज्ञासूनां कृते ज्ञानप्रदायकं तथा च मुमुक्षूणां जीवानां कृते विवेकोदयेन चरमसुख-शान्ति-मोक्षप्रदायकमस्ति इति निश्चयेन वक्तुं शक्यते।

**सहायकग्रन्थसूची**


१) पाद्मसंहिता । भगवान् पद्मनाभः । सेमुअल सम्पति अयङ्गार । पाञ्चरात्र परिसंशोधन परिषद्, मद्रास । १९७४ ।

२) पुरुषोत्तमसंहिता। भगवान् पुरुषोत्तमः। पी. सीतारामभट्टाचार्यः। मदनमोहन मालवीय केन्द्रीय संस्कृत विद्यापीठम्, तिरुपति। १९७५ ।

३) पौष्करसंहिता । भगवान् विष्णुः । यतीन्द्र रामानुजाचार्यः । श्री सुदर्शन प्रेस, काञ्चीपुरम् । १९५६

४) स्कन्दपुराणम् (नागर, प्रभास, रेवा, वैष्णव-पुरुषोत्तमक्षेत्र-माहात्म्यानि)। महर्षि-वेदव्यासः। जी.पी. भट्ट। मोतीलाल बनारसीदास, दिल्ली। १९८६– १९९१ ।


**पाद टिप्पणी**

1 स्क.पु.वै.ख.पु.क्षे.मा. – १/१९-२६
2 स्क.पु.वै.ख.पु.क्षे.मा. – १/३८
3 तत्रैव – १/२८
4 स्क.पु.वै.ख.पु.क्षे.मा. – १/२२
5 तत्रैव – २/१६
6 तत्रैव – २/२९
7 तत्रैव – ३/२०
8 स्क.पु.वै.ख.पु.क्षे.मा. – ३/३७
9 तत्रैव – ३/४८
10 स्क.पु.वै.ख.पु.क्षे.मा. – ४/४७
11 तत्रैव – १२/१०३
12 तत्रैव – ४/७४
13 तत्रैव – ३/७६
14 स्क.पु.वै.ख.पु.क्षे.मा. – ८/२२-२५
15 तत्रैव – ७/२७
16 तत्रैव – ९/६३
17 स्क.पु.वै.ख.पु.क्षे.मा. – १०/२१
18 तत्रैव – १०/१०६
19 तत्रैव – १०/१०८
20 तत्रैव – १८/१३-१४
21 तत्रैव – १९/१८
22 स्क.पु.वै.ख.पु.क्षे.मा.– २१/७
23 तत्रैव – २३/५९-६०
24 तत्रैव – २३/६१-६३
25 स्क.पु.वै.ख.पु.क्षे.मा.– २४/१५-१९
26 स्क.पु.वै.ख.पु.क्षे.मा.– २८/४०, ४२
27 तत्रैव – १/३
28 तत्रैव – १/५
29 तत्रैव – १/४१
30 तत्रैव – २८/४५
31 स्क.पु.वै.ख.पु.क्षे.मा.– २५/५, ७-८